# Yajnavalkyakritam Surya Stotram 11

# याज्ञवल्क्यकृतं सूर्यस्तोत्रम् ११

## Document Information

Text title : Yajnavalkyakritam Surya Stotram 11

File name : yAjnavalkyakRRitaMsUryastotram11.itx

Category : navagraha, viShNupurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : viShNupurANa | adhyAya 3/5/16-26||

Latest update : October 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2024

*sanskritdocuments.org*

# याज्ञवल्क्यकृतं सूर्यस्तोत्रम् ११

याज्ञवल्क्य उवाच ।
नमस्सवित्रे द्वाराय मुक्तेरमिततेजसे ।
ऋग्यजुस्सामभूताय त्रयीधाम्ने च ते नमः ॥ १६॥

नमोऽग्निषोमभूताय जगतः कारणात्मने ।
भास्कराय परं तेजस्सौषुम्णरुचिबिभ्रते ॥ १७॥

कलाकाष्ठानिमेषादिकालज्ञानात्मरूपिणे ।
ध्येयाय विष्णुरूपाय परमाक्षररूपिणे ॥ १८॥

बिभर्त्ति यस्सुरगणानाप्यायेन्दुं स्वरश्मिभिः ।
स्वधामृतेन च पितृंस्तस्मै तृप्तात्मने नमः ॥ १९॥

हिमाम्बुघर्मवृष्टीनां कर्त्ता भर्त्ता च यः प्रभुः ।
तस्मै त्रिकालरूपाय नमस्सूर्याय वेधसे ॥ २०॥

अपहन्ति तमो यश्च जगतोऽस्य जगत्पतिः ।
तस्य धामधरो देवो नमस्तस्मै विवस्वते ॥ २१॥

सत्कर्मयोग्यो न जनो नैवापः शुद्धिकारणम् ।
यस्मिन्ननुदिते तस्मै नमो देवाय भास्वते ॥ २२॥

स्पृष्टो यदंशुभिर्लोकः क्रियायोग्यो हि जायते ।
पवित्रकारणात्माय तस्मै शुद्धात्मने नः ॥ २३॥

नमः सवित्रे सूर्याय भास्कराय विवस्वते ।
आदित्यायादिभूताय देवादीनां नमो नमः ॥ २४॥

हिरण्मयं रथं यस्य केतवोऽमृतवाजिनः ।
वहन्ति भुवनालोकचक्षुषं तं नमाम्यहम् ॥ २५॥

इति विष्णुपुराणे तृतीयभागे पञ्चमाध्यायानितर्गतं

याज्ञवल्क्यकृतं सूर्यस्तोत्रं समाप्तम् ।

विष्णुपुराण । अध्याय ३/५/१६-२६ ॥

viShNupurANa . adhyAya 3/5/16-26..

Proofread by PSA Easwaran

*Yajnavalkyakritam Surya Stotram 11*

pdf was typeset on October 2, 2024

Please send corrections to *sanskrit@cheerful.com*